International Journal of Sanskrit Research 2022; 8(6): 294-296

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 294-296
© 2022 IJSR
www.anantaajournal.com
Received: 20-05-2021
Accepted: 28-06-2021

**ज्ञानदीप्ति बला**
Ph.D. Scholar, MSCBD University, Baripada, Mayurbhanj, Odisha, India

**Corresponding Author:**
**ज्ञानदीप्ति बला**
Ph.D. Scholar, MSCBD University, Baripada, Mayurbhanj, Odisha, India

# संस्कृतसाहित्ये पाण्डुलिपिपरम्परा

**ज्ञानदीप्ति बला**

**सारांश**:
तत्र शास्त्रान्तर इव पुरा साहित्यशास्त्राणां मूललेख: हस्तलिखितशास्त्रेषु नाम हस्तप्रतेषु लिपिबद्ध आसीत्। अत: तेषां हस्तप्रतशास्त्राणाम् (Manuscript) सम्बन्धे किञ्चित् विवरणमत्र समासेन प्रस्तूयते। शास्यते अनेन इति शास्त्रम्। एतच्च प्रामाणिकतथ्यानिर्णायकं हस्तलिखित शास्त्रस्य नामान्तराणि विद्यन्ते। तानि यथा – हस्तलिखितशास्त्रम्, हस्तप्रतविद्या, हस्तलेख: पाण्डुलपिशास्त्रम्, हस्तप्रतशास्त्रम् इति, अत्र हस्तलिखित – हस्तप्रतशब्दयोरर्थ: - हस्तेन लिखितं हस्तलिखितम्। हस्तेन लिखिता प्रति: - हस्तप्रति:, हस्तप्रत: वा। प्रकाशित ग्रन्थानामप्रकाशितरूपमेव हस्तलेखरूपेण सुविदितम्। प्राचीनकाले यदा यान्त्रिकसाधनेन प्रकाशन व्यवस्था प्रचार: प्रसारणं नाभूत्, तदा हस्तलेखानां प्रसार: जायतेस्म। तदानीन्तन समयेमूलभूतपाण्डुलिपीनां प्रयोजनत्वात् राजप्रासादेषु, धर्मानुष्ठानेषु, मठमन्दिरप्रभृतिषु प्रतिलिपिकारा: स्वहस्तेन लिखन्तिस्म, यत्तु भारते तथा विदेशेषु भूयान् प्रचार: चलतिस्म तत्र पाण्डुलिपिशब्देन पाण्डु नाम प्रथमलेख: तत्तु शुद्धाशुद्धमिश्रितं लेखरूपं वुध्यते। हस्तलिखितशास्त्रस्य स्वरूपसम्वन्धे कथितम् कर्त्तव्यमकर्त्तव्यं च नित्येन कृतवान वा पुंसा येनोपदिश्यते तत् शास्त्रमभिधीयते। तत्र ये ये ग्रन्थराशय: प्रकाशिता: सन्ति तेषां मूलाधारभूता: सन्ति हस्तलेखा:। सत्सु वहुषु प्रकाशितेष्वपि वहव: हस्तलेखा: अद्यतने अपि अप्रकाशिता: वर्त्तन्ते। तेषां संकलनं, सूचीकरणं, अध्ययनं, संरक्षणं, संशोधनं संपादनं च विधातव्यम्।

**कूटशब्द**: पाण्डुलिपि:, हस्तप्रतशास्त्रं, क्षेत्रं, सुरक्षा।

## प्रस्तावना

हस्तप्रतशास्त्रं पाण्डुलिपिविज्ञानरुपेण सुप्रथितं विद्यते। यत: मानवजीवनस्थ दीनचर्या संस्कृति सामाजिकं रीति-गीति-प्रथा-धर्म-आचार-व्यवहार: मनवैज्ञानिक निखिलतथ्य अस्मिन इस्तप्रतग्रन्थे लिपिवद्ध: विद्यते। पाण्डुलिपिहस्तप्रतसम्बन्धे वा ये ये विषया प्रामुख्येन पर्यालोच्यन्ते तेषां विवरणं पदीयन्ते।

१. पाण्डुलिपि विज्ञानस्य[2] अनुसन्धान प्रक्रिया। एतस्या: क्षेत्रीयमनुसन्धानमपि अस्मिन् अन्तर्भाव भवति।
२. भौगलिकस्तथा ऐतिहासिक – प्रक्रियया हस्तप्रत-प्राप्तिनित्तं स्थाननिर्देश:।
३. हस्तप्रतानां प्राप्तिस्थाने प्राप्तहस्तप्रतस्य सम्बन्धं निरुपणम्।
४. हस्तप्रतानां विविधपाठानां संकलनक्षेत्रं निरुपणम्।
५. हस्तप्रतकालनिर्णयस्य विविधपद्धतय:।
६. हस्तप्रतस्य कर्गज-लेखनीस्तथा मसि प्रभूति द्रव्येण संग्रह: प्रयोगश्च।
७. हस्तप्रतविज्ञानस्य ऐतिहासिकपृष्टभूमिस्तथा विषयनिरुपणशैली।
८. हस्तप्रतलिपिकाराणां[3] व्यक्तित्वं लिपीनां वैशिष्ट्यम्।
९. हस्तप्रतस्य प्रामाणिकतापरीक्षणं पाठलोचनञ्च।
१०. हस्तप्रतानां सुरक्षानिमित्तं साधनानि।
११. हस्तप्रतानां संग्रहालय तेषां निर्माणविधि:।
१२. हस्तप्रतानामुपयोगस्तथा अलंकरणम्।
१३. हस्तप्रतेषु चित्रस्तथा भाषानिर्णय:।
१४. हस्तप्रतानां संशोधनं परिवर्धनं प्रचारप्रसारश्च।




हस्तप्रतशास्त्राणां रेखाचित्रसहितं विवरणम्

**तत्र पाण्डुलिपिप्रप्तिसम्बन्धे क्षेत्रद्वयं परिकल्प्यते। पुस्तकालयं तथा स्वपरिचितस्थानम्। पुस्तकालयस्य त्रिविधम्-**

१. धार्मिकपुस्तकालय-मठ-मन्दिर स्वतन्त्रग्रन्थागारः।
२. राजकीय पुस्तकालयः।
३. केनापि राज्येन स्थापित ग्रन्थागारविशेषः।
४. पुस्तकालयः शिक्षायतन पुस्तकालयः शिक्षायतन इत्युक्तेः विद्यालयः, महाविद्यालयः, विश्वविद्यालयः प्रभूतयः परिगण्यते।

सूक्ष्मतया विचारविमर्शात् एतत् सुनिश्चित यत् भारतवर्षे अधिकतया प्रचलित लिपिः- ब्राह्मी।[४] इयं लिपिः अकारादि क्रमेण आसीत्। तत्र याहालिपयः प्रायतः बाहुल्येन प्रसारियन्ते स्म। तासां परिगणनं वक्ष्माणरीत्या प्रदतम् –

| | |
|---|---|
| १– ब्राह्मीलिपिः | १४ – अंकलिपिः |
| २ – यवनानीलिपिः | १५ – गणितलिपिः |
| ३ – चीनी लिपिः | १६ – उत्क्षेपलिपिः |
| ४ – अंगलिपिः | १७ – निक्षेपलिपिः |
| ५ – बंगलिपिः | १८ – विक्षेपलिपिः |
| ६ – मगधलिपिः | १९ – प्रक्षेपलिपिः |
| ७ – द्रविड़लिपिः | २० – मध्यक्षरविस्तारलिपिः |
| ८ – गंधर्वलिपिः | २१ – शास्त्रावर्त्तलिपिः |
| ९ – दक्षिणलिपिः | २२ – गणावर्तलिपिः |
| १० – नागलिपिः | २३ – देवलिपिः |
| ११ – गरूड़लिपिः | २४ – चित्ररेखान्वितलिपिः |
| १२ – मङ्गंल्यलिपिः | २५ - चक्रलिपिः |
| १३ – मनुष्यलिपिः | |

**पाण्डुलिपिगत शुद्धाशुद्धयः -** प्राचीनकाले ये लिपिकरा आसन् तेषां दुर्वुद्धि वसान् बहूनि अशुद्धिवाक्यानि दृष्टिपथारुढानि भवन्ति यथा – रामः पदस्थले कदाचित् अनवधानात् 'म'कार स्थाने 'य'कार पाठात् 'रायः' संज्ञातः एवं चे पुनः 'य' कारस्य शीररेखा प्रदर्शनात् 'राच' इति जातः। पुनः 'रा' स्थाने 'स' कार पाठात् 'सच' चति शब्दः जातः एवं रीत्या एकारस्य शब्दस्य प्रामादवशात् वहोवः अपभ्रंशा संज्ञातः। एवं च भ्रमवशात् कश्चित् लिपिकः सरोवरः स्थाने 'रा' काराभावे 'शवर' इति जानम्। तस्मात् लिपिकारेण अज्ञानात् अनवधानात् दृष्टिदोषात्

**चित्तचापल्यात् वा पाण्डुलिपिशास्त्रेषु प्रक्रमेण बहवः भ्रमाः जाता। पाण्डुलिपीनां कालनिर्णयसन्दर्भे यत् वाह्यसाक्षम् अन्तरंगसाक्षम् समाश्रियते। तदित्थम् वाह्यसाक्षम्**

(क) वाहय उल्लेखः
(ख) अनुश्रुतिः
(ग) ऐतिहासिकघटणा
(घ) सामाजिकपरिस्थितिः
(ङ) सांस्कृतिक उपादानम्

**२. अन्तरंग साक्ष्यम्**

(क) अन्तरंगसाक्ष्यस्य स्थूलपक्षः
(१) लिपिः
(२) कर्गजलिप्यासनम्
(३) मसि
(४) लेखनपद्धतिः
(५) अलंकारणम्
(६) अन्यः

हस्तलिखितग्रन्थाः अस्माकं संस्कृतेः वाहकाः भवन्ति। ते तु सांप्रतिककालेन सह अतीतस्य योगसूत्राणि सन्ति। बहुविधासु भाषासु संस्कृतस्य भूमिका पाण्डुग्रन्थपरम्परायां सर्वातिशायिनी वर्तते। वस्तुतः द्विसहस्रवर्षेभ्यः संस्कृतभाषा भारतीय-सभ्यतायाः संस्कृतेश्च प्रकृष्टसाधनरूपेण कार्यं निर्वहति। तन्माध्यमेन साहित्यम् दर्शनिकविचारधारा, भौतिकमाध्यात्मिकं विचाराणि च सर्वविधं मानविकदृष्टिसमर्थ चिन्तनं प्रचलति स्म। अद्यापि त ज्ञानराशेराधाररूपेण प्रप्यक्षमेव हस्तलिखितग्रन्थानां महत्वभुरी कुर्वन्ति विद्वांसः। यद्यपि वहवः ग्रन्थाः संप्रति मुद्रणं प्राप्ताः तथापि तुलनात्मकविशलेषणाय प्रामाणिकपाठनिर्णयार्थञ्च मातृकाग्रन्थानामुपयोगः स्वीक्रियन्ततराम्। अधिकं तु सत्स्वपि मुद्रितग्रन्थेषु साधुपाठसमन्वितेषु पूर्वपुरूषाणां उपलब्धिरूपेण, बहुश्रमं स्वीकृत्य निर्मितिरूपेण प्राधान्यं कर्तुं न शक्यते। पक्षान्तरे अस्माकमुत्तरपुरूषाणां मनसि पूर्वसूरीन् प्रति

कार्त्तज्ञं सम्मानबोधं च जनयितुं तेषां कृतीनां परिचयं च अस्माभिरवश्यं करणीयमिति सद्विचारश्च करणीय।

लिपिविज्ञानस्य विकाशज्ञानर्थमपि हस्तलिखितपुस्तकानां महानुपयोगिता सिद्ध्यति, कथं लिपिनां क्रमविकाश: संजातस्तद्ज्ञानार्थमपि ते ग्रन्थानुशीलनीया:, अननैव प्रकारेण बहुकारणेभ्य: हस्तलिखितपुस्तकानां सुष्ठु संरक्षणमवश्यमेव करणीयमिति अस्मिन् प्रसङ्गे नास्ति काचित् विप्रतिपत्ति:। संप्रति सूक्ष्मचिन्तोत्तोलनद्वारेण (by micro-filming and dizitization) एषा पाण्डुलिपिग्रन्थानां सत्स्वपि संरक्षितेषु स्थूलप्रतिरूपेण च तानि पुस्तकानि संरक्षणमर्हन्ति। अस्मिन् प्रसङ्गे प्रोफेसर सीतारामेया वदन्ति –

[5]Is it not like ignoring and ailing father after taking his photograph, if a manuscript is neglected just because it is microfilmed? (1983)

Eras. महोदयेनापि स्वकीये Humanist इति प्रबन्धे Encyclopedia of Religion and Ethics, arts पुस्तके स्वाभिमतमुपमुपस्थाप्य प्रत्नपुस्तकानां महिमां प्रतिपादयित्वा लिखन्ति -

[6]"We kiss the oldsanps ----------- of the saints and we neglect their books which are more oly and reliable relics."

कर्गजं, हस्तनिमितं कर्गजं तालपत्रं वा पाण्डुलिपि लेखनाय मुख्यसाधनरूपेण प्रायत: कल्प्यन्ते येषां द्रव्याणां गच्छताकालेनैव विनष्टर्जायते। एतादृशोऽयं ग्रन्थो व्यवहारकारीणां यत्नपूर्वकव्यवहार: निर्मितस्य पत्रादिवस्तुनां गुणवत्तामधिकृत्य एव चिरम् वा अचिरं स्थास्यति इति निर्णितो भवन्ति। अत: नाशशीलानां पाण्डुग्रन्थानां नाशकारणानां ज्ञानं पाठकानां संरक्षकाणां वा अवश्यमवधारणीयमस्ति।

**पाण्डुग्रन्थानाम् अवक्षयकारणानि: -**

पाण्डुलिपिग्रन्थानामवक्षयकारणानि मया नीचै: प्रदत्तानि सन्ति- कालप्रवाह:, अग्निदाह:, जलप्लावनम्, तीव्रमुष्णञ्च वातावरणम्, धूलिप्रवेश:, वायुमण्डलआद्रता, नानाविधा: वाष्पप्रक्रिया, अणुजीवानामुपस्थिति:, पीपिलिकादिकीटविशेषा:, मूषकादय जन्तव:, सर्वोपरि असहृदया: मनुष्या:। यथा अनेकासु पाण्डुग्रन्थपुष्पिकासु दृश्यते –

> "जलाद्रक्ष तैत्वाद्रक्ष रक्ष रक्ष मां श्लथबन्धमात्।
> आशुभ्य: परहस्तेभ्य एवं वदन्ति पुस्तकम्।।"

जलम्, तैलम्। मूर्खा मनुष्यास्तु अन्येभ्योऽपि अतीव भयङ्करा: दशमशतकस्य प्रसिद्धोऽलङ्कारिको राजशेखर: काव्यमीमांसायां[७] लिखति –

> सिद्धं च प्रबन्धम् अनेकादर्शशतं काव्यात्।

यद् इत्थं कथयन्ति-निक्षेप विक्रयो दानं देशोत्यागोऽल्पजीवितम; त्रुटिको वह्निरम्भश्च प्रवन्धश्र्चेद हेतव:।

> तैलाद्रक्षेद् जलाद्रक्षेद् रक्षेच्च श्लथबन्धनात्।
> मुर्खहस्ते न दातव्यम् एवं वदति पुस्तकम्।

**Compare** – उदकानिल-चौरेभ्यो मुषकेभ्यो हुताशनात्।
> कष्टेन लिखितं शास्त्रं (ग्रन्थं) यत्नेन परिपालयेत्।।

**The six factors which abstruct vidya are -**

> दूतं पुस्तक-शुश्रुषा नाटकाशक्तिरेव च।
> स्त्रियस्तन्द्री च निद्रा च विद्याविध्नकराणि षट्।।

The play of dice, service (repair) of Book, indulgence in extertainment like witnessing plays, women-relations (cupidity) laziness and excessive slaping labits those six dosa spoil the studies.

**Limatic Conditions -**

जलवायु परिस्तितावपि तालपत्रमथवा कर्गज पाण्डुलिपिपुस्तकनां क्षयो जायते। वायुमण्डले आर्द्रतातारतम्भकारणात् पुस्तकानि अपि बहु प्रभावितानि सन्ति। आर्द्रताया अल्पंशताशास्थितौ पत्रेषु च्छिद्रं जायते, अधिके सति। मोल्ड इति अणुजीवप्रभावेन तत्ग्रस्तं भवति।

**Then other destroyers are -**

**Fungus (कवका:)** एतेषां स्थितिकारणात् पत्राणां मध्ये उन्मोचनयोग्यता नष्टी भवति। पत्राणि परस्परा संलग्न सन्त: व्यवहारस्य योग्यतां परित्यजन्ति। तेन पत्राणां क्षयं विना परस्परेभ्यो असंलग्नकारणमसम्भवप्रायो भवति।

**उपसंहार: -** हस्तलेखानां मौलिकाधाररूपेण तालपत्राणि उपजीव्यं क्रीयतेस्म। तत्र डा.एस.एम.कत्रे[८] महोदयेन 'भारतीयपाठसमीक्षा' इति पुस्तके सप्तमशताब्द्या: इतिमुल्लिखितवान्। परन्तु हस्तप्रतस्य समय: ततोऽपि प्राचिनतर:। यत: तत्र शिलाया: ताम्रपत्रे लिखितदानपत्रं निश्चिततया प्रथमशताब्दीमध्ये इति अनुमीयते। प्रा.बी.बी. चौबे[९] महोदय:- "Lectures On Manuscriptology" इति पुस्तके व्रवीति यत् प्राचीनकालादारभ्य तालपत्रस्य प्रयोग: एकोनविंशतिपर्यन्तं प्रचलित आसन् इति । तालपत्रस्य प्रयोगस्थलं भारतवर्षे विशेषरूपेण दक्षिणभारते-आन्ध्रप्रदेश-तामिलनाडु-केरल-कर्णाटक-ओडिशा-बिहार-वङ्गप्रभृतिसु परिलक्ष्यते, तथैव भारतस्य दक्षिणदिशायां नेपाल-श्रीलङ्का-थाईलेण्ड्-बर्मा-ईण्डनेसिया प्रभृतिदेशेषु दृश्यते। काव्यमीमांसायां राजशेखर: तालपत्रविषये वर्णयति यत्-तस्यसम्पुटिका, सफलकखटिका, समुद्रक:, सलेखनीमषभाजननि ताडिपत्राणि भूजत्वचोवा सलोहकण्डकानि तालदलानि, सुमम्पृष्टाभित्तय: सततसन्निहिता: स्यु: ।

## संदर्भ सूची

१. हस्तलिखितशास्त्रप्रवेशिका – प्रो. डॉ. मुकुन्द वाडकर
२. पाण्डुलिपि विज्ञान – डॉ. सतेन्द्र:
३. भारतीय प्राचीन लिपिमाला पृ-१५६
४. मध्यकालीन भारतीय कलाएँ एवं उनका विकास – पृ-४३।
5. Introduction to Manusctiptology by R.S. Sivaganesh Murthy; C1996 p. 77.
6. Encyclopedia of Religion and Ethics, arts, Vol.-VI, P.831.F
7. (Kāvya Mimamśā, ch.10, p.53 Edited by Dalal and Shastri, Revised Edition : K.R. Shastri, Vadodara; Baroda Oriental Research Institute 1934)
८. डा.एस.एम.कत्रे - 'भारतीयपाठसमीक्षा'
९. प्रा.बी.बी. चौबे महोदय:- "Lectures On Manuscriptology